नामांक Roll No.

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | | | |

No. of Questions — 16

No. of Printed Pages — 3

# P—16–3—Sanskrit III

## प्रवेशिका परीक्षा, 2011

### संस्कृत — तृतीय पत्रम्

### ( संस्कृत साहित्य — गद्य-काव्य एवं रचना )

समय : $3\frac{1}{4}$ होरा:

पूर्णांक : 40

**परीक्षार्थिभ्यः सामान्यनिर्देशाः**

(1) परीक्षार्थिभिः सर्वप्रथमं स्वप्रश्नपत्रोपरि नामाङ्कः अनिवार्यतः लेख्यः ।

(2) सर्वे प्रश्नाः अनिवार्याः ।

(3) प्रत्येकं प्रश्नस्योत्तरमुत्तरपुस्तिकायामेव देयम् ।

(4) प्रत्येकं प्रश्नभागस्योत्तरं क्रमानुसारमेकत्रैव लेखितव्यम् ।

(5) प्रथम प्रश्नस्य चत्वारः ( i, ii, iii एवं iv ) भागाः सन्ति । प्रत्येक भागस्य उत्तरस्य चत्वारः ( **अ, ब, स** एवं **द** ) विकल्पाः सन्ति । समुचित विकल्पस्य उत्तराक्षरं उत्तर-पुस्तिकायां निम्नलिखित तालिकां निर्माय एकस्मिन् स्थाने एव लेखनीयानि ।

| प्रश्न क्रमाङ्कः | समुचित उत्तराक्षरम् |
|---|---|
| 1. (i) | |
| 1. (ii) | |
| 1. (iii) | |
| 1. (iv) | |

1. (i) आचार्य पं० बदरिप्रसाद शास्त्रिणा लिखितं भारत वन्दनम् खण्डकाव्ये कस्यार्चनम् कृतम् ?

(अ) भूदेवताया: (ब) दुर्गाया:

(स) लक्ष्मीदेवताया: (द) सरस्वत्या: । $\frac{1}{2}$

(ii) सिंहस्य केन सह महान् स्नेहोऽभूत् ?

(अ) दमनकेन (ब) करकटेन

(स) सञ्जीवकेन (द) शुना । $\frac{1}{2}$

(iii) राजहंसस्य किम् नाम आसीत् ?

(अ) हिरण्यगर्भ: (ब) पद्मकेलि:

(स) कर्पूर: (द) पक्षि: । $\frac{1}{2}$

(iv) चूडामणि: कस्य नाम आसीत् ?

(अ) हिरण्यगर्भपुत्रस्य (ब) क्षत्रियस्य

(स) वैश्यस्य (द) नापितस्य । $\frac{1}{2}$

2. पक्षिण: कुत्र निवसन्ति स्म ? 1

3. विलास: कुत्र निवसति स्म ? 1

4. विष्णुशर्मा कीदृश: अध्यापक आसीत् ? 1

5. राजा खड्गमादाय कुत्र गत: ? 2

6. पुरुषाणामर्थ: कैरुपायै: भवति ? 2

7. कस्मात् कारणात् मूषकं सिंह: हन्तुमिच्छति स्म ? 2

8. कुट्टिनी केनोपायेन घण्टां प्राप्तवती ? 2

9. (i) 'हन्' धातो: लुङ् लकारे प्रथम पुरुषस्य रूपाणि लिखत । 1

(ii) 'गम्' धातो: लिट् लकारे उत्तम पुरुषस्य रूपाणि लिखत । 1

10. केषाञ्चित् **पञ्च** वाक्यानां संस्कृतेऽनुवादो विधेय: — $5 \times 1 = 5$

(i) राम और श्याम विद्यालय में पढ़ते हैं ।

(ii) हमारे खिलाड़ियों ने क्रिकेट शृंखला जीती ।

(iii) राष्ट्रमण्डल खेलों में भारत को हॉकी का स्वर्ण पदक मिला ।

(iv) हमारे विद्यालय के अध्यापक विद्वान हैं ।

(v) मुझे कल दिल्ली जाना है ।

(vi) मैंने अपना पाठ पढ़ लिया ।

(vii) मैं गुरुजनों का सम्मान करता हूँ ।

11. अधोलिखितयो: कथयो: **एकस्या** कथाया: सारांश: संस्कृते हिन्द्यां वा लिखत — 3

(i) बुद्धि-माहात्म्यम्

(ii) नीलवर्ण शृगाल कथा ।

12. निम्न गद्यांशस्य ससन्दर्भं भावार्थो लेख्य: — $\frac{1}{2} + 1\frac{1}{2} = 2$

ततस्तदवचनमाकर्ण्य गरुत्मता प्रभुर्भगवान्नारायण: सृष्टि-स्थिति प्रलयहेतु: विज्ञप्त: ( विज्ञापित: ) स समुद्रमण्डदानायादिदेश । ततो भगवदाज्ञां मौलौ निधाय समुद्रेण तान्यण्डानि टिट्टिमाय समर्पितानीति ।

13. अधोलिखित पद्यांशस्य भावार्थो सप्रसङ्गं लेखनीय: — $\frac{1}{2} + 1\frac{1}{2} = 2$

भार्या दुष्टा शठं मित्रं, भृत्यश्चोत्तरदायक: ।
ससर्पे च गृहे वासो, मृत्युरेव न संशय: ॥

14. अधोलिखितेषु गद्यांशेषु केषाञ्चित् **त्रयाणां** सप्रसङ्गं व्याख्या कार्या — $\frac{1}{2} + 1\frac{1}{2} = 2 \times 3 = 6$

(अ) दमनकोऽब्रवीत्-देव ! अस्ति तावदयं महान् भयहेतु: स शब्दोऽस्माभिरप्याकर्णित: किन्तु स किं मन्त्री हि भवति य: प्रथमं भूमित्यागं पश्चाद् युद्धं चोपदिशति । अस्मिन् कार्यसन्देहे भृत्यानामुपयोग एव ज्ञातव्य: । नर: स्वस्यात्मन: बुद्धे बलस्य बन्धुस्त्रीभृत्यवर्गस्य च सारं विपद्येव जानाति ।

(ब) एवं पिङ्गलक: सत्कृत्य तं समुपवेश्य च स्वयं तदाहाराय स्निग्ध-मैणेयमाने तुं समुद्यतो बभूव । अत्रान्तरे तस्य सुहृद् सञ्जीवकोऽपि समागत: । स च पिङ्गलकं जिगमिषुमवलोक्यावोचत् देव ! कुत्रैकाकी गन्तुमिच्छति भवान् ? भवताऽनुजायाहारं दित्सुरहं पृच्छामि भवन्तं यदद्य हतमृगाणां मांसानि क्वेति ?

(स) गृध्रो वदति-सन्त्येव दूता बहव: । किन्तु ब्राह्मण: एव कर्तव्य: । राजाह-तत: शुक एव व्रजतु । शुक ! त्वमेवानेन सह गत्वास्मदभिलषितं ब्रूहि । शुको ब्रूते-यथाज्ञापयति देव: । किंत्वयं दुर्जनो बक: । तदनेन सह न गच्छामि ।

(द) राजाह-बन्धुर्वा किं वा विश्वासघातक: इति कथं निर्णेतुं शक्य: स्यात् । यातु प्रस्तुतमनुसंधीयताम् । मलयाधित्यकायां चेच्चित्रवर्णस्तदधुना किं विधेयम् ? मन्त्री वदति-देव ! आगतप्रणिधिमुखान्मया श्रुतं तन्महामन्त्रिणो गृध्रस्योपदेशे, यच्चित्रवर्णेनानादर: कृत: । ततोऽसौ मूढ़ो जेतुं शक्य: ।

15. कस्याप्येकं विषयमवलम्बय स्वसंस्कृते निबन्धो लेखनीय: — 4

(i) सदाचार:
(ii) परोपकाराय सतां विभूतय:
(iii) विज्ञानस्य मानवजीवने महत्वम् ।

16. स्वयमेव महेश: मत्वा गणेश्वर ग्रामस्थ राजकीय प्रवेशिका संस्कृत विद्यालयस्य प्रधानाध्यापकाय विवाह-समारोहे सम्मिलितुं दिनद्वयावकाशार्थं प्रार्थनापत्रं लिखत । 3

**अथवा**

रचना प्रकाशनार्थं दैनिक समाचार पत्र सम्पादकाय पत्रं लिखत ।